# Govardhanavasaprarthanadashakam

# ગોવર્ધનવાસપ્રાર્થનાદશકમ્

## Document Information

Text title : govardhanavAsaprArthanAdashakam

File name : govardhanavAsaprArthanAdashakam.itx

Category : vishhnu, krishna, raghunAthadAsagosvAmin, stavAvalI, dashaka

Location : doc_vishhnu

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# ગોવર્ધનવાસપ્રાર્થનાદશકમ્

નિજપતિભુજદણ્ડચ્છત્રભાવં પ્રપદ્ય
    પ્રતિહતમદધૃષ્ટોદ્દણ્ડદેવેન્દ્રગર્વ ।
અતુલપૃથુલશૈલશ્રેણિભૂપ પ્રિયં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૧॥

પ્રમદમદનલીલાઃ કન્દરે કન્દરે તે
    રચયતિ નવયૂનોર્દ્વન્દ્વમસ્મિન્નમન્દમ્ ।
ઇતિ કિલ કલનાર્થં લગ્નકસ્તદ્દ્વયોર્મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૨॥

અનુપમમણિવેદીરત્નસિંહાસનોર્વી-
    રુહઝરદરસાનુદ્રોણિસઙ્ઘેષુ રઙ્ગૈઃ ।
સહ બલસખિભિઃ સઙ્ખેલયન્સ્વપ્રિયં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૩॥

રસનિધિનવયૂનોઃ સાક્ષિણીં દાનકેલે-
    ર્દ્યુતિપરિમલવિદ્ધં શ્યામવેદિં પ્રકર્ષ્ય ।
રસિકવરકુલાનાં મોદમાસ્ફાલયન્મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૪॥

હરિદયિતમપૂર્વં રાધિકાકુણ્ડમાત્મ-
    પ્રિયસખમિહ કણ્ઠે નર્મણાલિઙ્ગ્ય ગુપ્તઃ ।
નવયુવયુગખેલાસ્તત્ર પશ્યન્રહો મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૫॥

સ્થલજલતલશષ્પૈર્ભૂરુહછાયયા ચ
    પ્રતિપદમનુકાલં હન્ત સંવર્ધયન્ગાઃ ।
ત્રિજગતિ નિજગોત્રં સાર્થકં ખ્યાપયન્મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૬॥

સુરપતિકૃતદીર્ઘદ્રોહતો ગોષ્ઠરક્ષાં
    તવ નવગૃહરૂપસ્યાન્તરે કુર્વતૈવ ।
અઘબકરિપુણોચ્ચૈર્દત્તમાન દ્રુતં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૭॥

ગિરિનૃપહરિદાસશ્રેણિવર્યેતિનામા-
    મૃતમિદમુદિતં શ્રીરાધિકાવક્ત્રચન્દ્રાત્ ।
વ્રજનવતિલકત્વે ક્લૃપ્તવેદૈઃ સ્ફુટં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૮॥

નિજજનયુતરાધાકૃષ્ણમૈત્રીરસાક્ત-
    વ્રજનરપશુપક્ષિવ્રાતસૌખ્યૈકદાતઃ ।
અગણિતકરુણત્વાન્મં ઉરીકૃત્ય તાન્તં
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૯॥

નિરુપધિકરુણેન શ્રીશચીનન્દનેન
    ત્વયિ કપટિશઠોઽપિ ત્વત્પ્રિયેનાર્પિતોઽસ્મિ ।
ઇતિ ખલુ મમ યોગ્યાયોગ્યતાં મામગૃહ્ણ-
    ન્નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૧૦॥

રસદદશકમસ્ય શ્રીલગોવર્ધનસ્ય
    ક્ષિતિધરકુલભર્તુર્યઃ પ્રયત્નાદધીતે ।
સ સપદિ સુખદેઽસ્મિન્વાસમાસાદ્ય સાક્ષા-
    ચ્છુભદયુગલસેવારત્નમાપ્નોતિ તૂર્ણમ્ ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીગોવર્ધનવાસપ્રાર્થનાદશકં સમ્પૂર્ણમ્ ।

*Govardhanavasaprarthanadashakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*